Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 1 | ISSN : 2581- 6306

# स्वतंत्रविधि संज्ञाविधान पक्षे मीमांसकमते मतान्तर विवेचनम्

डॉ. जगदीश प्रसाद जाटः
(वैयाकरणशास्त्र विशारदः) प्राचार्य,
गुरुकुल शिक्षा समिति, मौजमाबाद,
जयपुर, राजस्थान, भारत।



**Article Info**
Volume 4, Issue 1
Page Number : 154-173

**Publication Issue :**
January-February-2021

**Article History**
Accepted : 16 Jan 2021
Published : 30 Jan 2021

**सारांशः**– अविधित्वाच्च स्थानिवद्भावोऽपि नास्ति। यत्र चोत्ववलोपयोरेककालाप्राप्तिस्तत्रैव व प्रश्लेषेणोत्वं बाध्यते। न चेह तथेति न चैवं सूत्रेप्युत्वापत्तिः। द्यौश्चासौ वृचेति विग्रहो न तु दिवोऽपि। तत्र ज्ञापकस्य भविषयत्वेन लुकि कृते पश्चात्प्राप्त्युत्वं तुल्यकालेन वलोपे न बाधिष्यते। विशेषणेन तदन्तविधेः समानाधिकरण्यं स्वीकारान्तस्य दिव इति। विशेषणस्यापि सौत्रपरनिपात इति। तदयुक्तं दिवो वान्तत्वाव्यभिचारेण विशेषण समासानुपपत्तेः।

**मुख्यशब्दः**– स्वतंत्रविधि, संज्ञाविधान, पक्षे, मीमांसकमते, मतान्तर, गुणः, विवेचनम्

**स्वतंत्रविधि पक्षे मतान्तराविमर्शः।** यत्तु प्रज्ञाचक्षुराह[1]। अस्य केवलस्वातन्त्र्ये न कस्यापि योगस्य नियमत्वप्रसंगः। तथा हि मिदि पुगन्तलघूपधाक्षुप्रक्षुद्रविधग्नोऽतिगां। ऋतश्च संयोगादेर्गुणः[2] गुर्णोति संयोगाद्योः[3] ऋच्छत्यृतां[4] ऋदृशोऽङ.गुणः[5] शीङः सार्वधातुके[6] गुण इत्येते प्रतिषिद्धार्था भुवोकर्मकस्य गुणो वेत्यपि प्रतिसिद्धार्थः। इको झल् हलन्ताच्चेति सनः कित्वात्। अभ्यासलोपार्थस्सकर्मक प्रतिषेधार्थश्च। ओर्गुणोऽपि[7] लैगवायन इत्यत्र प्रतिषिद्धार्थः संज्ञापूर्वको विधिरनित्य इति ज्ञापनार्थश्च। 'सार्वधातुकार्धधातुकयोः[8] निजां त्रयाणां गुणः श्लाविति[9] चानिगन्तार्थः।

गुणो यङ् लुको[9] प्रतिषिद्धार्थम् अनिगन्तार्थ च जागोऽविचि णल् ङित्सु इति प्रतिषिद्धार्थो ह्रस्वस्य गुण इत्यनेनैव यथा स्यात् इको गुणवृद्धी इत्यनेन मा भूत् इत्येवमर्थमन्यथा मोनो इत्यत्र सम्बुद्धौ शाकल्यस्येतावनार्षे इति प्रगृह्यत्वं न स्यात् सम्बुद्धि[10]। निमित्तत्वाभावात्। अथ संबुद्धाविति परसप्तमी न निमित्तसप्तमीति चेन्न। एवं हि हे मधो इतीत्यत्र न स्यात् न लुमतास्येति सम्बुद्धि[11], परत्वाभावात्।

जसि च[12] इकोगुणवृद्धीति बाधकस्य प्रथमयोः पूर्वसवर्णस्य बाधनार्थम्। ऋतोङिसर्वनामस्थानयोः डौप्रतिषिद्धार्थं सर्वनामस्थाने बाधकबाधनार्थ च घे ङिति इति प्रतिषिद्धार्थ मृजेवृद्धिः सिचि वृद्धिरनित्यनिगन्तार्थ उर्णोतेर्विभाषा उणु इस् त इति स्थितेऽन्तरत्वादिको गुणवृद्धी वृद्धौ सत्यां सार्वधातुकयोरित्यौतोर्गुणे औति सति सिचिवृद्धिरिति नित्यायां वृद्धौ प्राप्तायां विकल्पार्थ तेनौर्णवीदित्यपि भवति।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

उतो वृद्धिलुकि हलि[13] अनेनैव वृद्धिर्यथा स्यात्तेन मा भूदित्येवमर्थं तेन हि सत्यां वृद्धौ सार्वधातुकेति गुणः स्यात् अनेन तु सत्यं न भवति वचनसामर्थ्यात्।

न च तत्र वचनसामर्थ्य त्रयुतिष्ठतिमुधतिष्ठतीत्यत्र चरितार्थत्वात्। अभ्यस्तप्रतिषेधार्थ च नाभ्यस्तस्येत्यनुवृत्तेः। उर्णोतेर्विभाषा[14] उतोपधाग्रहणं नियमार्थे स्यात्। तथाहि पुगन्तलघूपधस्येति किमयं बहुव्रीह्योर्द्वन्द्वः उत तत्पुरूषयोः। आद्येऽनिगन्तार्थमिति सार्वधातुकेत्येव सिद्धे तत्पुरूषद्वन्द्वमाश्रित्य भिन्नमित्यादौ प्रतिसिद्धार्थत्वात्। क्षिपरित्यत्राद्येऽनिगन्तार्थमिति सामर्थ्यात् कृति चेति निषेधः। भिन्नमित्यनु तथा न निष्ठाकित्वस्य श्रूयुकः कितीत्यत्र[15] चरितार्थत्वात्। तदेवमस्य केवलस्वान्त्र्येऽपि न कस्यापि नियमत्वशंका प्रसंग इति। तदसत्। मिद इतीकार प्रश्लेषपक्षे पुगन्तलघूपधस्येति तत्पुरूषपक्षे[16] | च यण् आदिर्यणादि स्तस्मात्परं लुप्यते तस्माद्यण आदे: पूर्वस्य च गुण इति पक्षे चानिगर्थत्वासम्भवादेगर्थत्वे च नियमावश्यंभावात् वसिष्ठ: पचतीत्यत्र चकारस्थानिकः सत्यसति वा गुणे विशेषाभावात्।

न चोभयत्र बहुव्रीहिपक्षे निगर्थतेति वाच्यं लक्षणापत्या तस्य जघन्यत्वात्। निषादस्थपतिन्यायेन तत्पुरूषस्यैवाभ्यर्हितत्वात्। किञ्च बहुव्रीहिपक्षे पुगन्तेत्यन्तग्रहणमनर्थकं पुगांगस्य विशेषणात्तदन्तविधिलाभात् अञ्जेन वायुको विशेषणे न क्षतिः बहुव्रीहिपक्षेऽपि ह्यलोन्त्यस्येति पुक् एव गुणे न भवितव्यमिति।

तत्साहचर्यात् लघूपधेत्यपि न बहुव्रीहिः। वपति वहतीत्यादिनिर्देशाच्च अन्यथात्रापि धात्वंत्यस्य गुणः स्यात्। क्षिप्रक्षुद्रयोरपि पूर्वस्येति वचनसामर्थ्याद यणादीति न बहुव्रीहिरिति स्थितमाकरे।

अस्तु चोभयत्र बहुव्रीहिः माभून्मिदेरिकार प्रश्लेषः तथापि नानिक: प्रसड़ आत्संध्यक्षरयोर्वक्ष्यमाणरीत्या[17] अप्रसंगात्। व्यंजनस्यापि न प्रसङः। अनान्तर्यात् वचनादनन्तरतयो भविष्यतीति चेत्। न कर्ता नेता भवितेत्यादावन्तरतमे सम्भवत्यन्तरतमपरिभाषा बाधकल्पने नाभावात्। बाधकल्पनाच्च वरं नियमकल्पनां हि सामान्य शास्त्रेणाप्राप्त एव गुणपक्षे वृद्धया प्रतिरोधीति प्रतिप्रसूयते।

अनिगर्थविधौत्वपूर्वोत्पादनं परिभाषा बाधश्च। अपूर्वविधेश्च प्रतिप्रसवो लघीयानिति शास्त्रस्थितिः। अश्वाभिधानीमादत्त इत्यत्रेवात्राप्यार्थीवृद्धेर्निवृत्तिः तदुच्यते फलतो नियम भाषेति। अस्तु च कथं विद्येत न तस्य बाधमाश्रित्य निगर्थता। तथापि सिचादिगुणे पुर्नसा सम्भवति। इको गुणवृद्धी इत्यस्य हि केवलस्वातन्त्र्ये सार्वधातुकार्धधातुकयोः नित्यस्याप्यनिगर्थतैव वाच्या उक्तावत्वचैव अन्यथास्यैव नियामकस्यापि योगस्य नियामकत्व शंकेति वचन प्रतिज्ञा हानिः स्यात्। ततश्च मिदादेरप्यनिकोनेनैव गुणसिद्धेमिदेर्गुण[18] इत्याद्यनिगर्थत्वमिति।

न च वाच्यसार्वधातुकेत्यस्यान्त्यानिकि विध्यर्थत्वान्मिदि गुणादिनेत्यंनिगर्थ इति। एवं हि आनन्तर्यपरिभाषावदलोन्त्यपरिभाषा बाधनीया स्यात्। अनन्त्यपरता च दुर्लभः।

न च वचनसामर्थ्य नियमार्थतयाप्युपपक्षे। अनेकशास्त्रबाधकल्पनापेक्षया प्रागुक्तप्रतिप्रसवरूपत्वस्य वृद्धिमात्रबाधरूपस्य वा नियमस्य कल्पने लाघवात्। अस्तु तर्हि मिदि गुणादिः सर्वादेश इति चेत्। ना तत्राप्यन्तरतमपरिभाषा बाधापत्तेः[19]।

निष्ठा शीस्विदिमिदिक्ष्विदिधृष इत्यादिष्वानर्थक्यप्रसंगाच्च । शीङ् मिदिभ्यः परस्य सेट् निष्ठायाः कित्वनिषेधस्य हि गुणप्रवृत्तिः फलां मिदिगुणादेश्च सर्वादेशत्वे प्रतिषेधविषयसाधयन्न चेति किं त्वनिषेधेन।

न च मेद्यतीत्यादौ क्ङिति चेति गणुवृद्धयोर्निषेधात्पुनरनेनेको गुणः प्रतिप्रसूयत इति वाच्यम्। क्ङिति चेति दद्यनंतरस्थविषेधः परसप्तमी[20] तर्हि व्यवहितस्येको न तत्प्रसंगः[21] । अथ निमित्तसप्तमी तथापीकोगुणवृद्धी इत्यनैमित्तिकस्य कथं निषेधप्रसंगः।

न च सार्वधातुकेत्यादिना प्राप्तोऽनेन प्रतिषिध्यत इति युक्तम् । तस्यानिगर्थतायास्त्वयोक्तत्वात् । क्ङिति चेत्यनेनत्विकोगुणवृद्धयोर्निषेधात् ततश्च सार्वधातुकगुणेनिक् स्थानिकत्वान्न निषद्धंशक्यः नापिको गुणवृद्धीत्यपि प्राप्तः प्रतिषेधमर्हति। अनैमित्तिकत्वात् परसप्तमीपक्षे सार्वधातुकगुणेनैव सिद्धेन विधायकत्वात् तत्पुरूषपक्षे त्विको गुणवृद्धीत्येव सिद्धरनिच्छतापि नियमत्वस्य स्वीकारप्रसंगात् तु व्यवहितत्वादिकः न चोपधागुणस्याप्यत्र प्रसंगः । बहुव्रीहिपक्षे एतेन प्रतिसिद्धार्थत्वेऽपि मिदेर्गुणः । ऋदृशोऽङि गुण इति दृशिग्रहणं चानर्थकमेव । तथा क्ङिति चेति प्रतिषेधस्यानै मित्तकगुणवृद्धयविषयत्वे ऋतश्च संयोगादेरित्युपन्यस्ताः पंचापि विध्योऽनर्थका । गुणो यङ्लुकोरिति प्रतिषिद्धार्थमुक्तं यङ् ग्रहणञ्च । अभ्यासेको ङिदनन्तरत्वासंभवात् । अनैमित्तिका निषेधेऽपि नेष्ट सिद्धिः। नैमित्तिकश्च गुणो नाभ्यासे प्रसजति येन प्रतिषिध्येत। एवं मृजिदृशिमुचिगुणेऽपि[22] वृद्धौ च योज्यमिति न व्यभिधानमपास्तम्।

यत्तु मुचिगुणेप्यभ्यासगुणश्चानिगर्थः उचितो नेकि प्रतिषिद्धार्थ इति न व्यभिधानम् । तदसत् । सार्वधातुकगुणेनैव सिद्धे नानर्थ क्यापत्तेः । अभ्यासेवाऽनिकोऽन्त्यस्यसंभवात् । हलादिः शेष[23] विधानात् अभ्यासविकारेप्यपवादा नोत्सर्गान् विधीन् बाधन्त इति न्यायाच्च ।

अनन्त्यानिगर्थ तु न संभवतीत्युक्तमेव बाधत्वात् । यत्तु मुचो गुणविधानसत्यास्लोपार्थ सकर्मकप्रतिषेधार्थ चेति। तदप्यसत् । अत्र लोपोऽभ्यासस्येत्यनन्तरं गोह इतिवत् मोचो कर्मकस्येति न्यासेनाऽपि सिद्धेः । अन्यतरगुणस्यौत्सर्गिकस्य दुर्वारत्वात्। तथा जागृ इत्यस्य प्रतिषिद्वार्थत्वेऽपि ङित्पर्युदासोनर्थक एव। क्ङिति चेत्येषनिषेधो यद्यनैमित्तिकयोर्गुणवृद्धयोस्तर्हि ङिति सार्वधातुकगुणस्य निषेधात्।

न च डिदिति । तदप्यसत् । अत्र लोपोऽभ्यासस्येत्यनन्तरं गोहेनेत्ययमस्य निषेधः अनन्तरजागृ[24] गुणमात्रविषयत्वात्। न च डिति प्रतिषेधः सामर्थ्यात् व्यवहितमपि सार्वधातुकगुणं बाधिष्यत इति वाच्यम् । क्ङिति चेत्येव गुणवृद्धयोद्धयोरपि निषेधसिद्धे न गुणनिषेधो ङिति वृद्धिप्रतिप्रसवार्थमित्यपि सुवचत्वात् । यथा गृहमेधीये आज्यभागौ यजतीति वाच्यं वोदकेन प्राकृतसफलाप्राप्तावितरपरिसंख्यार्थमिति गृहमेघीयाधिकरणपूर्वपक्षे स्थितम् । तत्र तु विधिरत्र[25] निषेध इतियान् परं भेदो यद्यपि परिसंख्या श्रयणं त्रिदोषरूष्टम् । इह तु वृद्धिप्रति प्रसवफलकत्वेन विधिसादृश्यादितरविध्यपेक्षया लघुत्वाच्य न दोक्ष्यति। विशेषनिषेधस्य सामान्याप्यनुजाफलकत्व नियमात् । एवमोर्गुणः घेड़ितीत्यप्यनर्थकम्।

क्ङितीति निमित्तसप्तमीपक्षे निषेधस्य प्रकृत्वात् । परसप्तमीपक्षे तुमिदिगुणाद्यानर्थक्यमुक्तमनुसन्धेयम् । तथा हस्वस्य गुण इत्यप्यनर्थकम् ।

यत्वनेनैव यथा स्यादिको गुणवृद्धीत्यनेन माभूत् । अन्यथारम्भानो इतीत्यत्र प्रगृह्यत्वं न स्यात् । सम्बुद्धिनिमित्तत्वाभावात् । न च सम्बुद्धावितिपरसप्तमी तथा हि सति मघो इत्यत्र न स्यात् । न लुमतेति निषेधादिति। तदसत्। न लुमतेति निषेधस्यानित्यत्वात्। अन्यथा

गुणोप्यत्र न स्यात् । न च गुणं प्रत्येवात्यित्वमिह किञ्चित् त्रयो इतीति भाष्ये निर्देशसामर्थ्यात्प्रगृह्यसंज्ञा प्रत्यप्यनित्यत्वकल्पनायाः सुशकत्वात् । गुणं प्रत्येवानित्यत्वमित्यस्यापि गुणविषय इति व्याख्यानात् गुणे गुणाश्रयेव कार्यमिति व्याख्यातुमुचितत्वात् । कथमन्यथा अत्र नुम प्रसंगः व्यावृत्यर्थमिकग्रहणं समर्खेत । वस्तुतस्तु गुणाश्रयेत्यपि न स्थितम् । सोवुपीति जर्गृहीतीत्यादिदर्शनात् । यत्तु सम्बुध्यन्तस्यैदितस्य प्रगृह्य संज्ञेति विधानाद् दोषः इति न व्यभिधानम् । तदसत्। विभक्तिवशेषणेन तदन्तविधेरसम्भवात् । तन्वेर्वहे कृत ङविति हे अर्चित चितीत्यत्रापि प्रगृह्यतापत्तिः । न चेष्टापत्तिः। निमित्त सप्तमीवादिभिरनिष्यमाणत्वात् । न चैषां[26] लोकवेदयोरप्रयुक्तत्वेनालक्ष्यतेति वाच्यम् । तथा सति हे कृत दोहे विहितेरे इत्यादौ सम्बुद्धिलोपार्थ मेङ् ग्रहणमिति सिद्धान्तापत्ते।

न च गोत इति तपरत्वमोकारान्तोपलक्षणार्थमित्युक्ते हे गोरितिवत् हे कृत तङौरिति वृद्धयाभाव्यं तत्कथमोदन्ततोति वाच्यम्। गोयवोरेवोपक्षणस्य स्थितत्वात्। अत्रापि प्रमाणमेङ्ग्रहणमेवेति चेत्। नैष दोषः। ईदूदेदिति[27] सम्बन्धमनुवर्तयिष्यते तेन चैतत् विशेष्यते तत्स्थानिकत्वाच्चौपचादिकं सामानाधिकरणं तत्रेदस्थानिकस्यैवं तमपि अपित्वमसम्भवात् प्रसज्यत । तत्स्थानिकतापि उत्वमात्रमादाय दीर्घ तदसम्भवात् । प्रतिहस्वश्चेत्यत्र यथानेनोकारस्थानिकस्यै वौतौ भविष्यति नान्यत्र। यद्वा उञ[28] इत्युत्तरसूत्रे उकार आवृत्य पृथग्योगः स चानन्तरस्य नियमार्थे उ स्थानिक एवौत् प्रगृह्यं स्यात् इति।

न चानर्थके आवृत्तिरदृष्टम् । आवर्तमानस्यार्थवत्वात्। यद्वा उञ[29] इति द्विपदे अकारस्य सम्बन्धीनानुबन्ध इति यावत्स उः प्रगृहयमित्यर्थः एवञ्च कृत्वा संज्ञासंज्ञिनोऽनेकविभक्तिताप्यबाधिता भवति। तेन उ इत्यस्यार्थवदान्नावृत्तो विरोधः काश्चित् । अथवा किं न एतेनावृत्तिव्यसनेन। उन इति योगं विभक्तिको निर्देशः नियमार्थ विदं। ञ इति द्वितीयं तन्न। उ इति जानुबन्ध सौ[30] उकार इति प्रगृहयमित्यर्थ सिद्धमिष्टम् ।

यदपि जसि च ऋतो डिसर्वनामस्थानयोः नित्यो तदिको गुणवृद्धि बाधकस्य प्रथमयोः पूर्वसवर्णस्य[31] बाधनार्थमिति । तदप्यसत् । भूतपूर्वगतिमाश्रयता बाधकत्वानड़ीकारात् । अथानेन सामर्थ्याद् गुण एवावशिष्यते न पूर्व सवर्णेन विक्रियते इति प्रत्यापत्तिरियमित्युच्यते मोराजीतिवत्[32] तर्हि स्पष्टमेव विषयत्वमनूरीकृतम् । तथा ऋतो डीति ङिगृहणे[33] घेर्डितीति च प्रतिषिद्धार्थमिति। तदप्यसत् । परसप्तम्यां निषेधाप्रसक्तेः । निमित्तसप्तम्यनैमित्तिकगुणस्यन निवृत्तेः । अस्तु तर्हि क्ङिति[34] चेत्यविशेषेण निषेधः। कथं इक इति नापेक्षिष्यते नाव्यनन्तरस्येति न्यायः न चानिर्दिष्टग्रहणं विज इट् । वतुदावदमुषेत्यादि ज्ञापकात् । तेन मेद्यति भिद्यत इत्यादौ व्यञ्जनस्यान्त्यस्य प्राप्तः सार्वधातुकेति गुणाः पश्चवे भिद्यत इत्यादाविको गुणवृद्धीति अनन्त्यस्येकोऽपि प्राप्तः स क्ङितिचेति प्रतिषि इति पुनर्मिदेगुणः[35] पुगन्तेति गुणो यङ्लुकोरिति च प्रतिप्रसोष्यत इति नोक्तोपालम्भ इति चेत् न स्यात्।

अथ प्रथमातिक्रमे कारणाभावादिति वृद्धिशब्द एवाश्रित शब्दव्यापारः स्यात् । एवमप्यदेङित्याश्रितशब्दव्यापारं स्यात् । प्रथमेति न्यायात्। तथा चेममित्यादौ दोष एव किञ्च पूर्वसूत्रे वृद्धिशब्दस्य विधेयतया प्राधान्यादादैच्छब्दस्य प्राधान्यानुरोधायादैजिति या वृद्धिरित्येव सम्बन्धो न्याय इति । तस्माद् विपरित सम्बन्धो माविज्ञायीति गुणवृद्धीग्रहणमिति। तदेतदव्युत्पन्नाभिधानो तथा हि द्वि

विधोऽर्थः पदार्थो वाक्यर्थश्च तत्र पदार्थोऽभिधेयोऽन्तरता वाक्यार्थस्तु लक्ष्य इत्येके। संसर्ग मर्यादा लभ्य इत्यपरे। पदाप्रितीतिपूर्वकत्वात्सर्वथा वहिरङस्तत्र तात्पर्यवशाद्यत्र पदे वाक्यार्थ मेवानुवर्तते। तत्र पदार्थोऽपि नान्तरीयकत्वादनुवर्तत[36] एव। तदत्र यदि वाक्यार्थस्येक इत्यनेनानवयस्तर्हि आनन्तर्य पदार्थएवाधिकरिष्यते। स च पूर्वसूत्रयोः स्वरूपमेव[37] संकेतात् पूर्वमर्थपरत्वाभावात्। अदेङा[38] दैच्चानुवृत्योस्त्वर्थपरत्व मेव अशब्दसंज्ञेति स्वरूपपरत्व[39] निषेधात् । ततश्च तदर्थकयोरिहानुवृत्तौ यौगयताबलाद् वृद्धिशब्देन विहिता यदि नास्त्येवार्थः सम्पद्यते च विपरीतो बाधात् । यदपि प्रथमा तिक्रमेव इत्याधुक्तं तदपि अनवबोधनिबन्धनं ।

न हि सूत्रे प्रथमोच्चारितत्वाभिप्रायकमिदम् । किं शितिचेति प्रतिषिद्ध इति पुनर्मिदेगुणः पुगन्तेति[40] गुणो यङ्लुकोरिति[41,42] च प्रति प्रसोष्यत इति नोक्तोपालम्य इति चेत्। हन्तैवं कामयते लौवायन: येभिन्न: नेनिक्त इत्यादावभ्यासगुणो वृद्धिश्च निषिध्येत्। तयोस्तु अकित्यवकाश: इष्टापत्तिरिति चेत् । तर्हि शास्त्रारम्भाक्षेपोऽपि[43] दुःसमाधानः प्रयोगानिष्टनिवृत्यर्थं शास्त्रकृद्भिरिक पदानुवृत्ति निर्दिष्ट परिभाषाडनन्तरन्यायादयो नोक्ताभवेयुः। एवञ्च कृतमपि पत्रमपलक्षणामिष्ट स्यापीष्टापत्तिं कृत्वार्थ वन्नामुपपादयतो महानैयायिकत्वमित्यलमति प्रपञ्चेन। तस्मादिको गुणवृद्धीत्यस्य विधित्वेव तद् विधिनो नियमत्वकल्पनापत्तेर्गुणवृद्धयधिकारे[44] पुनर्गुणवृद्धिग्रहणाच्च नायं विधिर्नवाधिकारः। किन्तु परिभाषापक्षेऽपि किं गुणवृद्धिग्रहणेनेति चेत् । सत्यम् । स्वसंज्ञया विधाने नियमार्थं तत् । अन्यथा दिवऔदित्यादावपि[45] नियमः स्यात् । नौतस्य । एवं यथा इत्यात्वं । इममित्यत्र कथं पुनर्गुणवृद्धिग्रहणेन स्वसंज्ञया विधाने नियमो लभ्यत इति चेत्।

उक्तमेतदधस्तदिति । एवमपि इक स्नावित्येव सूत्रणीयं लाघवात् । सत्यम् । विचित्रा सूत्रस्य कृतिः व्याकृतिः । अत्र प्राञ्चः मा कानिपुनर्गुणवृद्धिग्रहणे इक इत्येवास्तु।

पूर्वसूत्रद्वयमनुवर्त्यते। तदयमर्थः वृद्धिरित्येवं[46] विधी यमाना आदैच: गुण इति चोदेङ् इक एव भवन्तीति। तेन द्यौरित्यादौ न दोष इति। यत्त्वत्र प्रज्ञाचक्षुः सूत्रद्वयस्येह नाधिकारः । इक इत्यनेनानन्वयात् । ततः शब्दाधिकारः । अत्र च गुणग्रहणसम्बन्धेनेक इत्यस्य निराकांक्षत्वाददेडादिभिः सम्बन्धेमानाभावात् । अथान्यवचनादित्यादि युक्त्याडदेङित्यत्र सम्बन्धो वृद्धी संज्ञाया. इति चेत् । एवमपि सूत्रद्वयस्य सम्बन्धानुवृत्तिसामर्थ्याददेङादिभिरपि सम्बन्ध इति चेत् ।

सन सम्बन्धानुवृत्तेरदेङ् इत्यन्यतरदनर्थकं स शब्दव्यापारार्थं स्यात् । तथा च कदाचित् आदैजदेङिति यौ वृद्धिगुणौ इत्यर्थः स्यात्[47] । ततश्च द्यौः यथा इममित्यत्रैव स्यात् । अथ प्रथमातिक्रमे कारणाभावादिति वृद्धिशब्द एवाश्रित[48] शब्दव्यापार: स्यात् । एवमप्यदेङित्याश्रितशब्दव्यापारं स्यात् । प्रथमेति न्यायात् तथा चेममित्यादौ दोष एव ।

किञ्च पूर्वसूत्रे वृद्धिशब्दस्य विधेयतया प्राधान्यादेच्छब्दस्य चोद्देश्यस्य गुणत्वा दिहापि वृद्धिशब्दस्य प्राधान्यानुरोधायहैजिति या वृद्धिरित्येव सम्बन्धो न्याय्य इति। तस्माद् विपरीतसम्बन्धो भाविज्ञायेति गुणवृद्धिग्रहणमिति । तदेतदव्युत्पन्नाभिधानम्। तथाहि द्विविधोऽर्थः पदार्थो वाक्यार्थश्च तत्र पदार्थोभिधेयोऽन्तरङ: वाक्यार्थस्तु लक्ष्य इत्येके संसर्ग मर्यादा लभ्य इत्यनेन पदार्श

प्रजातिपूर्वकत्वात्सर्वथा बहिररङः तत्र तात्पर्यवशाद्यत्र पदं वाक्यार्थमेवानुवर्तते। तत्र पदार्थोऽपि नान्तरायकत्वादनुवर्तत एव । तदत्र यदि वाक्यार्थस्येक इत्यनेनान्वयस्तर्हि अन्तरङ[49] पदार्थ एवाधिकरिष्यते।

स च पूर्वसूत्रयोः स्वरूपमेव संकेतात्पूर्वमर्थपरत्वाभावात्। अदेड. दैच्छब्दयोस्त्वर्थपरत्वमेव अशब्दसंज्ञेति स्वरूप परत्वनिषेधात्। ततश्च तत्तदर्थकयोरिहानुवृत्तौ यौग्यताबलाद् वृद्धिशब्देन विहितायादैचावित्येवार्थः सम्पद्यते न विपरीतो बाधात् । यदपि प्रथमातिक्रमे इत्याधुक्तम् । तदव्यनवबोधनिबन्धन न हि सूत्रे प्रथमोच्चारितत्वाभि प्रायकमिदम्। किन्तु शब्दाधिकार पक्षेप्यन्तरस्यानर्थक्य परिहाराय[50] स्वरूपपरत्वे क्लृप्तकल्प्यमानन्यायेन पूर्वत्र स्वरूपपरतया क्लृप्तयोगुणवृद्धिपदयोरेव तच्छब्द नोचितेति।

किञ्च पूर्वत्रगुणवृद्धिशब्दयोः संज्ञात्वेन विनियुक्तयोरादैजदेङः प्रतिगुणत्वाद् गुणे त्वन्याय कल्पनेति न्याये न तत्रैव स्वरूपलक्षणकल्पनो चिता। नादैजदेविपर्ययात्। अन्यथा गुणवृद्धयधिकारे पुनर्गुणवृद्धिग्रहणमाश्रित शब्दव्यापारार्थमित्युक्तेऽपि गुणवृद्धि पदाभ्यां संज्ञाभ्यामुपस्थापितयोरदेङादैचोरेव विज्ञायेत। ततश्चाकारादि शब्दैरकारादि विधाविक् पदमुपतिष्ठत इत्येवार्थः केन स्यात्। एवमनुवृत्ताभ्यां गुणवृद्धिपदाभ्यामिहत्य गुणवृद्धिपदविशेषणेऽपि द्रष्टव्यम्।

न चैवमर्थे लक्षकत्वप्रसङः मीमांसकैः तस्पेष्टत्वांशशब्द एव लक्षणेति पक्षेऽपि गुणवृद्धिपदाभ्यामदेङादैच्शब्दनिहितादेङादैज् लक्षणाप्रसङः । न च शक्ये कथं वक्ष्यमिति वाच्यम् । विशिष्टस्यान्यत्वात् । अथ तात्पर्यवशाद गुणवद्धिपदोपस्थापितत्वप्रकारिकैव लक्षणा नत्वकाराद्युपस्था पितत्व प्रकारितेति चेत् । तर्हि सूत्रद्वयसमुदायानुवृत्तावपि गुणवृद्धिपदयोरेव स्वरूपलक्षकत्वं भविष्यति। तात्पर्यान्नादैजदेड्. पदयोः विपर्ययात्।

यत्तु इहत्य गुणवृद्धिरेव तेनानुवर्तमानेन तुल्यार्थत्वेडनर्थकं भवतीति ततो विलक्षणार्थ गुणवृद्धिशब्दविहितादेङाद्यर्थ। भवतीति तदनुवृत्तिं विना नैवाभिमतार्थसिद्धिः। अथवानुवर्तमानेन भेदमनेन वा तद् विशेष्यते । तुल्यरूपत्वाच्चोभयोरर्थेनान्तरां विशेषणं व्यावर्तकमेव भवतीति विशेषणपदं गुणवृद्धिशब्दविहितत्वार्थ सम्पद्यत इत्यभीष्टसिद्धिः। सूत्रद्वयानुवृत्तिपक्षे तु विशेषणविशेष्यभावेनैव निर्वाहः कर्तव्यः ।

विशेषणविशेष्यभावेव कामचार[51] इत्यदेङादैज् ग्रहणस्य विशेषणत्वे अदेङादैजिति[52] ये गुणवृद्धी इत्यर्थः स्यात् स चानिष्टः द्यौः पन्था इममित्यत्रातिप्रसक्तेरिति न व्यभिघानम्। तदव्यसत् । यतः अर्थयोरेव विशेषणविशेष्यभावः शब्दयोरपि तदवारक एवतेति गुणवृद्धिशब्दोपस्था पितयोरेवार्थयोः स वाच्यः स चोभयोरविशेषः पदसम्भवन्नन्यतरस्यादेङादैच् ग्रहणस्य सामर्थ्यात् । स्वरूपपरत्वं कल्पयेत् ।

ननु गुणवृद्धिशब्दस्येति रूरूद्धनो दोषः। यदपि विशेषणं च व्यावर्तकमेव भतीति तत्र उपरञ्जकस्यापि[53] दर्शनात्। तथात्वे वैयर्थ्यं चेत् । वक्तत्यं तर्हि विनिगमकं विशेषणपदे गुणवृद्धिशब्दद्विशब्दनिहितत्वार्थ संपद्यते नादैङा दैजर्थमिति। तदेव हि युक्तमर्थधर्मत्वाद् विशेषणत्वादेः सम्भवति। चार्थयोरपि व्यावर्तकत्वं स्वरूपलक्षणया तां विना तु गुणवृद्धिपदयोरपि तदसम्भवम् । अथ तात्पर्य वशाद्

गुणवृद्धिशब्दयो रे व विशेषणत्वं कल्पने न तदर्थयोरदेङादैचोस्तर्हिसूत्रानुवृत्तावपि तथैवास्तु तात्पर्यवशादेव। कामचारवादस्तु यथा तात्पर्य सम्भवतीत्येवं परः। अन्यथा अहो विमलं जलं न घोटक छे महिषश्चरतीत्यत्रातिपत्तेः वाक्यार्थबोधः स्यात्।

राज्ञः पुरूषस्य[54] गौरित्यत्र पुरूषस्य राज्ञा गौरानीयतामित्यपि इष्यते वाक्यार्थबोधे प्रवृत्तेरप्यव्यवस्था स्यात्। किमत्र तात्पर्यनिर्णायकमिति चेत्। क्तसनो कित्करणं विज इडितिङित्व च तद् विक्षिप्रुः नपुदित्वा नुनुदिषति उद्विजितेति उपधागुणनिषेधार्थ क्रियते।

स च क्ङिति चेत्यन्तेन तत्र च चकारस्येत्यर्थस्य करणादिग्लक्षणस्य स निषेधः यदि चादेङादैच्छब्दयोरेव स्वरूपपरता स्यात्। तदोपधा गुणेऽतथात्वादिक् पदानुपस्थानादनिग्लक्षणत्वेन निषेधासम्भवादनर्थकं तत्स्यात्।

न च सामर्थ्यादनिग् लक्षणयोरपि निषेधः । चकार वैयर्थ्यापत्तेः । किञ्च अदेङादै शब्दविहितयोस्तयो रिकपदोपस्थानेनेग्लक्षणत्वेऽपि क्ङिति चेत्येतदनर्थकम् । इममित्यादौ क्ङितौभावात् । मनोरौ[55] वा पूतक्रयोरैवेत्यत्र[56] ङितो ङीषः सम्भवेऽपि सम्भवात् सन्नियोगशिष्टयोस्तददर्शनात् । सत्येतरविषाणयोरिव । यदपि पूर्वसूत्रे वृद्धिशब्दस्य विधेयतया प्राधान्यादादैजित्यस्योद्देश्यत्वेन गुणत्वादिहापि वृद्धिशब्दस्य प्राधान्यानुरोधाया है जितिया वृद्धिरित्येव सम्बन्धो न्यायः इति। तदप्यसत्।

यत्र ह्यनयोर्विधेयतास्ति तत्रास्तु प्राधान्यं निर्विवादः। इह तु शब्दाधिकारादुपस्थितस्यानुपूर्व मात्रस्याविवक्षितार्थस्य संज्ञिरूपमर्थ लिड़त्वे नोपस्थापयतो न विधेयत्वमूलकं प्राधान्यात् चैषा हि तत् स्यात्। स्वयं विध येतया विधेययार्थोपस्थापकतया वा। न चेह तदस्ति। प्रत्युतेदं संज्ञोच्चारणस्य संयुपस्थापकतया स्वयं कार्यानन्वयित्वेन सामर्थ्यात्[57] पूर्वक्लृप्तत्वाच्च तत्रैवायं न्यायः स्वरूपपरताङमयति।

नत्वादैगम् । यत्तु हे चानन्त दूहवृद्धिपदस्येक इत्यनेनानन्वयेन संज्ञात्वं न विधेयताया अपि च अविवक्षायामपितद् बोधितगुणप्रधानभावस्य क्लृप्तस्य विरोधद्विचक्षुस्तु। किञ्च पूर्वत्र प्रधानतयावगतो वृद्धिशब्दः स्वरित इतीहापि प्राधान्योपहित एवानुवर्तेत। अन्यथाऽन्यःस्वरितोऽन्यं हि विधेयताया फलति न चेह सास्ति। स्वरितत्वं शब्दस्वरूपे प्राधान्यं न सरूपम्। तद्विप्रधान इव प्रधानेऽपि न भिधते न खलु नामोच्चारणे गृहे वा वसन्ननामो भवति। न चानेकशब्दोः शब्दस्येति न्यायात्पूर्वत्रापि गुणवृद्धिशब्दावर्थापत्तौ न स्वरूपपराविति वाच्यम् । तथाहि सत्यादवै आदैचांसंज्ञेति विज्ञायेत । न चानर्थक्यमेकैकस्य त्रिषु संकेतनान्। किञ्च शक्तिर्नियमाय पूर्वशक्तिबोधनाय चोद्दिष्टस्यास्य लौकिकस्य स्वरूपमिति वचनादर्थपरत्वा सम्भवः।

न चास्यामवस्थायामयं शब्दसंज्ञा भवति । वस्तुतस्तु पूर्वसूत्रे वृद्धिशब्दस्य विधेयतया प्राधान्यादादैजित्यस्योद्देश्यतया गुणत्वादित्यप्यव्युत्पत्तिमूलकत्वमेव । संज्ञावाक्ये हि प्रदेशे प्रसिद्धो संज्ञामुद्दिश्य शास्त्रे प्रसिद्धाः संज्ञीवाच्यत्वेन विध गीयते । वृद्धिशब्दस्यादैचो वाच्या इति नियमपक्षेऽप्यस्यादैच एवेहोपस्थाप्य नान्य इत्यादैजुपस्थापकत्वमर्थोऽन्तरनिवर्तकत्वं वोपदिश्यते । तत्र ग्रहवत्संज्ञाशब्दोद्देश्यो वाक्यान्तरे प्रसिद्धत्वात्संज्ञीत्वज्ञातत्वाद् विधेय इति स्थितिः।

**संज्ञाविधान विषये मीमांसकमत विवेचनम् ।**

यत्तु संज्ञा विधीयत इत्युच्यते प्रधानमिति। तदुद्देश्यस्यैव प्रत्यायतया संस्कार्यत्वाच्च। मीमांसका हि उद्देश्यानेव ग्रहान्प्रधान मित्याचक्षते[58]। न तूपादेयलक्षणं प्राधान्यं संज्ञायाः । यद् गुणत्वं विरूध्येत् । गुणेत्वयायकल्पनेत्यत्र हि गुणत्वमनुपादेयत्वरूपं विवक्षितं न विधौ पर: शब्दार्थः इत्युपादेये लक्षणनिषेधात् । अत आदैचामेवोपादेयतया न स्वरूपे लक्षणायुक्ता। वृद्धिशब्दे उद्देश्यत्वान्न विरूध्यते सा। अवश्यं चैतदेवमास्थ्यमन्यथा यदुच्यते निपात एकाजनाङि[59]त्यत्र अजित्येकत्वं यत्तु नोतिवद् विवक्षितमित्येकग्रहणं ज्ञापकं वर्णनिर्देशे जातिनिर्दिश्यत इत्यस्यार्थस्येति तत्र सक्ते संज्ञिनो च उद्देश्यत्वेनतद्गतसंख्याया ग्रहैकत्ववद् विवक्षा प्रसनैक ग्रहणं स्यात् । समुदायव्यावृत्यर्थतया सामर्थ्यात्। वृद्धयान्तरविरोधाच्च । अत एव ङयाप्[60] प्रातिपदिकात्[61] धातो[62] रित्यादावेकत्वं विवक्ष्यते[63] । शास्त्रान्तर विहिताप्रत्ययानुद्दिश्यानेन प्रकृतोर्विधानात्तेन समुदायात्प्रत्ययो न भवतीति तन्त्र स्थितिः। तदुक्तं शब्दान्तरे भेदैः धातोरिति प्रत्ययोत्पत्तौ विवक्षितैकसंख्यत्वादिति । धातोस्तु प्रकृतित्वेनोपादेयतया विवक्षितसंख्याकत्वान्न समूहात्प्रत्ययोत्पत्तिरिति संज्ञा विधीयत इति तु वाचकत्वेन संज्ञा ज्ञाप्यत।

इत्यज्ञातज्ञापकत्वं विधित्वमादायोच्यते नोपादेयत्वमित्युक्तमेव । अतः संज्ञाशब्द एव गुणत्वात्स्वरूप लक्षणयानुवृत्तं सूत्रद्वये नैवेष्ट सिद्धेः नार्थोगुणवृद्धिग्रहणेनेति प्राचोक्तमपीच्यम् । यत्पुनराहः- देवपरिभाषेयं सा च लिङ्वती लिडं च श्रूयमाणं भवति। यथा "षष्ठीस्थानेयोगेत्यादौ[64] । यत्राप्यनुवृत्तित्वन्त्यं करोति तत्र यमविशेषं यथा व्रश्चेत्यत्र चकारम् । अतोऽनुवृत्तस्य लिङ्त्वसम्भवात्कर्तव्यं गुणवृद्धिग्रहणमिति तत्तुच्छम् । अलोन्त्यस्य अनुवर्तमानस्य लिङ्गत्वे कथयन्न इत्यपि चिन्त्यम् । यदप्युक्तम् । वृद्धिनादैजदेङ् गुण इत्यपि विधीपरार्थो तथा च गुणानां च परार्थत्वादिति न्यायेन वृद्धिर्य स्याचामादिरित्यादाविद[65,66] न सम्बन्ध्ये ते । इक इत्यत्र वृद्धिगुणविधानाभावादिति । तदप्यसत् । अलोऽन्यस्येति[67] इत्यत्र षष्ठीस्थानेयोगेत्यस्य सम्बन्ध प्रसङ्गत् ।

अथ परिभाषाप्रमेयो चान्तरवाक्यार्थः पूर्वानुवृत्तवाक्यार्थोपकार्यत्वा त्प्रधानमिति[68] नैतन्न्यायविषय इत्युच्यते। तत्प्रकृतेऽपि तुल्यं कथमन्यथा कृतेऽपि गुणवृद्धिपदार्थानवगमे नैतद भाविता आदैचो लिङ्गत्वावुपपत्तेः। आकारादीनां च स्वरूपस्यानुपस्थितावतिप्रसङ्गाभावेन स्वसंज्ञया विधानयत्नवैयर्थ्याच्च । अपि च गुणकृतात्मसंस्कार: प्रधानं प्रतिपद्यत इत्यपि न्यायोऽस्ति। यदप्यदेङादैचो नाकांक्षावशात् सम्बन्धः गुणपदसम्बन्धमानेण नैगाकांक्ष्यात् । किन्तु स्वरितत्व संज्ञानेन क्लृप्य तथाचोत्तरत्रापि सूत्रस्य सकल्पस्यैवानुवृत्तिर्भवेत् इति। तदपि न पृथक् स्वरितयोरन्यतरानुवृत्तावप्यन्यनिवृत्तिदर्शनात् । सत्यामपि चानुवृत्तौ दोषादर्शनात्। यदपि सकलसूत्रानुवृत्तौ गुणवृद्धिपदे संज्ञिपरे संज्ञापरे वा। नाद्योऽनन्वयात् । प्रकृतानुपयोगाच्च न हि तापः। वाक्यभेदप्रसङ्गत् । अपेक्षितालाभाच्चेति। तदप्यसंशय अर्थाधिकाराश्च रूपपरयोरेवानुवृत्तौ ताभ्यामादैजदेङोस्तादात्म्यस्य मुख्यस्यासंभवेऽपि वाच्यवाचकसबन्धेन वाच्ये वाचक रूपाध्यारोपादादै ज दे ङोच्चारणेन विधीयमाना आदै जङ्क इत्यर्थपर्यवसानेनोक्तदोषाभवकाशात् । प्रपञ्चितं[69] चैतत्प्रागेवेत्यलमियता स्यादेतत् ।

यद्यर्थाधिकारस्तत इक इत्यत्रेवादेगुण इत्यत्राप्युपस्थितमदेङादि वृद्धिसंज्ञामपि विरूध्यात् । नैतदपूर्वं चोद्यते।

यतो भाष्यकृतैवैतदापाद्यपरिहतं सम्बन्धमनुवर्तते इति। सम्बन्धत इति सम्बन्धकर्मणि घन वृद्धिग्रहणस्य विशेष्यस्य नपुंसकत्वात् । क्लीबत्वं घञजयाः पुंसीत्येतत् तु भावविहित घजादिविषयम् । तदयमर्थ: न केवलं वृद्धिग्रहणमिहानुवर्ततेऽपितु आदैज रूपेण सिजिना सम्बन्धमेव द्वयपदद्वयस्यापि स्वरितत्वात्। ततश्च सूत्रोपात्तमुजिसम्बन्धेन निराकांक्षावृद्धिसंज्ञा नादेङमिति अभिसम्बन्ध्यते अदेङोऽपि स्वसूत्रोपात्तसंज्ञया निराकाङ्क्षत्वादाकांक्षां नोत्थापयन्ति[70] । यत्र त्वन्यतरत्साकाक्षं तदेवाकाक्षं चेति। इह तु द्वावपि निराकाङ्क्षौ।

न चेहानुवृत्तिसामर्थ्यात्सम्बन्धेन भाव्यम् । अनुवृत्तेरिक सूत्रेऽर्थवत्वात् । आदैग्रहणं पुनर्नेह स्वकार्यार्थमनुवृत्तं किन्तु वृद्धिशब्दस्यान्यसम्बन्धनिवृत्तये तावतैवच कृतकृत्यत्वादिक सूत्रे नोपतिष्ठते प्रयोजनाभावात्। न चादेगुण इत्यत्रो पस्थितयोर्वृद्धिरादै[71] पदयोः परस्परसम्बन्धाद बोध कत्वं संज्ञासंज्ञिसम्बन्धास्य प्रागे व विहितत्वादिति वाच्यम् । प्रागुक्तसम्बन्धानुवादकतयाप्युपपत्तेः।

न चानुवादवैयर्थ्य वृद्धिशब्दस्यान्नदेङाभिरसम्बन्धार्थत्वेनार्थवत्वात् । इकसूत्रत्वादैचोहि त्वावृद्धिपदमेव प्रसर्पति। अत्र च दृष्टान्तं पादान्ते वक्ष्यति भाष्यकृत्।

यथा कान्तारात्ययार्थी सहायमुपादत्ते अर्तति जहातीति । नन्वेतदयुक्तम् । यदि हि पदद्वयमसम्बन्धमनुवर्तेत तत आदैग्रहणे नानवरो द्विपदमदेङाभिः कथं न संबध्येत । अथ परस्परसम्बंद्धमेवानुवर्तते। त्वत्कथमिक सूत्रेऽन्यतरज्जह्यात् । क्लृप्तानुवृत्तसम्बन्धत्यागे हेत्वभावात् ।

न च प्रयोजनाभावा एव हेतुः। वृद्धिरित्येवं विहित आदैच् इत्यर्थः लाभार्थत्वात्। एवं चोत्तरत्र पुनर्वृद्धिग्रहणमनर्थकमापद्येत। गुणांशेव संज्ञया विधानं न गम्यते। स्वरितशब्दद्विग्रहणानुवृत्यैव विधेयाकाङ्क्षापूरणादनाकांक्षितत्वेन गुणग्रहणस्य सम्बन्धासम्भवात् । अथ तदपि स्वर्यते हतैवमदेङ् ग्रहणमपि स्वर्यते। ततश्च पूर्वसूत्रद्वयानुवृत्येवेष्टसिद्धेः पुनर्गुणवृद्धिग्रहणानर्थक्यं दुः परिहरम् । एवं तर्हि वृद्धिग्रहणमेव स्वरितत्ववशादनुपतिष्ठते। नादैज् ग्रहणमदेङ्गुण इत्यत्र तु मध्ये सम्बन्धो न भविष्यति। मण्डूकप्लुप्तयोऽधिकारा भवन्ति । तद्यथा मण्डूका उत्प्लुत्योत्प्लुत्य मध्यदेशमसंस्पृशन्तोऽप्यन्यदेशं गच्छन्ति । एवमधिकारोऽपि आदेशं च संस्पृश्येक सूत्र एवोपस्थास्यति।

ननु मण्डूकानां चेत् नत्वा युक्तं प्रयत्नविशेषायत्नं मध्यवर्जनमग्रेनियतनं च वृद्ध्यादिशब्देषु नत्वा नैतद्युक्तम्। किञ्च स्वरितत्वेऽपि वृद्धिशब्दो यदि 'मध्येन् न सम्बन्ध्येत च इक इत्यत्रापि न सम्बध्येत विपर्ययो वा स्यात् । नियामकाभावात्[72] मण्डूकप्लुतिन्यायस्य प्रदेशविशेषसम्बन्धनियामकत्वासंभवात् ।

अत्राहुः चेतनस्याचेतनस्य वा सम्बन्धासम्बन्धयोः सर्वत्रैवाकाङ्क्षैव नियामिका। सावेक् सूत्रे स्त्रिलिङ्गनिर्देशात्। नादेङ्गुण इत्यत्र विधेया या गुणसंज्ञायाः श्रूयमाणत्वात् । तदुक्तं- येन यस्याभिसम्बन्धो दूरस्थस्यापितस्याप्तः अथतो समर्थानामानन्तर्यमकारणमिति । अथवा स्वरितत्वेन सामान्यतः प्रसक्तेरपि सम्बन्धो मध्ये लक्ष्यविरोधान्निवर्तते। लक्ष्यानुरोधित्वाच्च सप्रवृत्तेः ।

ननु स्वरितत्वादुपस्थितस्य नानाकाङ् क्षितत्वमात्रेणासम्बन्धः किन्त्वयोग्यत्वात् । अन्यथाङ्गमपदाधिकाराः सर्वत्रनान्वियुः । अनाकाङक्षितत्वात् तत्र प्रयोजनवशात्लक्ष्यानुरोधात् तत्राप्याकाङ्क्षोन्नीयते। न तथा प्रकृते विपर्ययात् । न चादेचामपि वृद्धिसंज्ञा अदेङो च वृद्धिसंज्ञेति शक्यते। प्रयोजनं कल्पयितुं पृथक् निर्देशवैयर्थ्यात्समानिविषयसंज्ञाद्वयवैयर्थ्याच्च । अत एव चास्वरसादाह भाष्यकृत् । अथवैकयोगः करिष्यते वृद्धिरादैजदेङ्[73] गुणो भवतीति।

न त्वेकयोगत्वं नैकवाक्यत्वं भिन्नविषय संज्ञाद्वयनिधेयभेदात्। नापि निरन्तरपाठः । अतिप्रसंगात् । स्वतः सिद्धत्वेन करिष्यत इति भविष्यदर्थानुपपत्तेः । अथादैजदेङो वृद्धिगुणविति सूत्रयिष्यत इति मतं तर्हि सौत्रन्यासभङः । भाष्योदाहृतैकयोगता स्वरूप विरोधात् । अत्राह कैयटः । एको भवति रूद्धयाहिन्यते वृद्धिरादैजदेङ् गुणे भवतीत्येकवाक्यत्वं संपद्यते। यद्यपि प्रतिपत्तिकाले भवति क्रिया भिद्यते वृद्धिरादैज् भवत्यदेङ् गुणो भवतीति।

तथाप्येककाला प्रतिपत्तिः पदैवादेचां वृद्धिसंज्ञा प्रतीयते। तदेवादेङां गुणसंज्ञासमूहालम्बनवत् । न प्रतीतिक्रमः। कथमेतदिति चेत्। उच्यते । संज्ञिविशेषसम्बद्धसंज्ञाद्वयस्याध्याहृतैक भवति क्रिययान्वयेन यथा रूणादिभिर्गुण इष्टः द्रष्टव्यैः प्रधानस्य क्रमस्य। यथा वा दशा पवित्रेण ग्रहेर्समाष्टीत्यत्र दशभिर्ग्रहः संमार्गस्य गुणत्वेन तन्त्रसम्बन्धः उक्तो भव देवादिभिः ।

उक्तञ्च - "तन्त्रत्व मै क रूप्येण भवेत्तुल्यो पकारतः" । उपकारान्यथात्वेऽनुभवदावृत्तिः लक्षणमिति। अत्रैतत् स्यात्। किं तन्नुर्णामपि पदार्थानां वृद्धिः आदैजदेङ् गुण इत्यन्तेषां मध्याहृतैक भवति सम्बन्धः तन्त्रेणोच्यते उत तत्तत्संज्ञिसम्बन्धविशिष्टसंज्ञा द्वयस्यैकः नाद्यः । सर्वेषामसंमृष्टानामेकभवत्यत्र ये पूर्वविधित्वस्यानर्थक्यस्य वा प्रसंगात् । तद द्वितीयपरस्परसम्बन्ध स्यान्यतोऽसिद्धत्वे तद् वैशिष्ट्यस्यानुवदितुमशक्यत्वात् । परस्परसम्बन्धस्य च तयोः प्रत्येकं भवति संबन्धाधीनत्वात् ।

एतेन द्विवचनान्तो भवति । इत्यध्याहरिष्यत इत्यपि परास्तम् । अतो भेदेनैव संज्ञा यजिसम्बन्धद्वयप्रतीतेनैकवाक्यत्वम्।

ननु च द्वयोर्वाक्यार्थयो'नरेकीभावेऽन्यत प्रमाणमस्तीति। अचो गृहीत्वा संज्ञाः क्रियन्त इति वाक्यं मनसि परिचिन्त्य भगवतः ।

तत्र यथाग्नये गृहपतये[74] पुरोडाशमष्टकपालं निर्वयति कृत्यानां व्रीहीणां सोमपवनस्पतये वरूणमित्यादिष्ट निर्वपतीत्यनुषंगो भवति। निर्वापभेदश्च कारकभेदाश्रयादनुषंग लक्षणादभ्यासादस्थित तथाप्यग्न्यादीनान्तोत्तर वाक्येऽन्वयः। तत् कस्य हेतो स्ववाक्येनात्र देवतापदेन आकाङ्ख्याद् विकल्पसमुच्चयात् । अत एवानुषः अस्ति चैकवाक्यत्वमेतेषामदेङ्गुणः वृद्धिरादैज् इग्यणः सम्प्रसारणमिति[75] यथा स्वं श्रुतपदार्थनियमेन वाचां संज्ञाः क्रियन्ते इति वाक्यैकवाक्यतया व्यवस्थापदेकवाक्यता वाचो[76] युक्तिरपि एतज्या यवलादेव स्वरितलक्षणायाद्यातिप्रसङग निवृत्तये समर्थतीयेति। एवमेक योगत्वमुषतेर[77] चैकयागेऽधिकारा भवन्ति। व्यवस्थानतिक्रमात् इति। तत्र यद् वा सम्बन्धे नेराकाङ्क्षा इत्येव हेतु। तर्हि किमजागलस्ततापमानेनैकवाक्यतोऽपवादन प्रयोजनः।

किञ्च स्वरितत्व निबन्धनो नाकाङ्क्षाधीनः सम्बन्धः किन्तु सम्बन्धाधीनमाकाक्षोऽपरम्। किञ्चेकयोगत्वेऽपि यद्यस्याकाङ्क्षा ततो भवितव्यमेव सम्बन्धेन् मतुप् सूत्रमिदमन्य नास्ति तर्हि तत् एव संबंधसिद्धेरेकयोगत्वाभिट नमनुदितम्। तस्मादत्रैकयोगत्वं नार्थैकत्वाभिप्रायं किन्त्वेकं तिङ् वाक्यमिति लक्षितवाक्याभिप्रायम्।

तेनादैज संबद्धा वृद्धिसंज्ञाऽदेसंबद्धा च गुणसंज्ञेति नास्ति वृद्धिसंज्ञा। अदेङाभि संबंधोऽन्तराकाङ्यात् प्रतिसिद्धम्।

ननु चैकयोगेऽनुवृत्तिर्भवतीत्य युक्तम् । यतश्चतुर्थेऽध्याये स्वयमेव वक्ष्यति । तदस्मिन्नास्ति इति देशे तन्नास्तीत्यत्र एकयोगेप्यनुवृत्तिर्भवति। यदयं तदस्यास्त्यस्मिन्निति मतुवित्यत्र द्विस्तत्ग्रहणं न करोतीति। अत्राहु: लौकिकस्तत्राधिकारोऽपेक्षालक्षण वक्षितः स एकयोगेऽपि न विरूध्यते इह तु शास्त्रीयोऽधिकार: स्वरितलक्षणः स चैक योगे विरूध्यते। यदुक्तोऽधिकारः प्रतियोगं तस्य निर्देशार्थ इति योगे यो मदुपतिष्ठत[78] इति। यत्त्वेकयोगत्वे कुत्वं कस्मान्न भवतीत्यादि भाष्यविरोधाप्रसंग इति भट्टाभिधानं तत्र तु ध्यामहे पदान्तत्वात्। अस्तु नाना योगत्व तदापि न दोषः अन्यवचनाच्चकाराकरणान्न गुणं संज्ञावृद्धिसंज्ञासंबंधमदेङोवाधीष्ठते।

यथादन्तेषु कृत्प्रत्ययोऽणसम्बन्धमसंज्ञित्वादनवकाशत्वात्तात्पर्याच्चेक विधेः । अणस्तु विर्पयात् । तथा हि न तावदादन्तो धातुः कप्रत्ययोऽण् संबंधम्। अस्य विषयो न चेति सन्देहः। आत इति साक्षादुपादानादेव। नाप्यादन्तादन्योऽस्यावकाशेऽस्ति। तात्पर्य चास्य तत्रैव तदुद्देशेनैव चविधानात्। अणि तु तद्विपरितमिति स बाध्यते एव।

अदेगुण[79] इत्यत्रानुवृत्तमपि वृद्धिग्रहणं संदिह्यते किमिहार्थे चानुवृत्ति रूत्तरोत्तरार्थापीति। सावकाश च वृद्धिसंज्ञा आदेच्। तात्पर्य च नास्ति अदेङ्. मात्रोद्देशेन प्रवृत्तत्वात् । गुणसंज्ञा तु तात्पर्यादसंदेहादनवकाशत्वाच्च वृद्धिसंज्ञा असम्बंधमदेङो बाधते। न चात्रानुवृत्तिसामर्थ्यात् तात्पर्यादिकल्पनम्। यतः स्वरितलिडनैतावत् प्रतिपन्नं इह प्रकरणे प्रतिसूत्रमनेन सन्निधातव्यमिति। सन्निहितं च पदं विधेयत्वेनानुवाद्यत्वेन तद्विशेषणत्वेन वान्वियात् । इह तु विधेयानुवाद्ययोः स्ववाक्य एव निर्देशाद् विशेषणत्वस्य च संभवादन्वय एवापहियते।

न चात्रोपस्थितेः वैयर्थ्यम् । इक सूत्रे नान्य लभ्य विशेषणसमर्पणाय प्रसर्यतोऽस्य ग्रामं गच्छन् तृणं स्पृशतीतिवदुपक्षणीयसम्बंधस्यावर्जनीयत्वात् । न च प्रकृतस्यानुग्रहोपसंज्ञिनोः संज्ञयोर्वा समुच्चयोऽस्ति। चायं वाक्येन निरपेक्षयोरूपास्तयोरेव परस्परं सम्बंध च वशीकारावगरात् । अधिकारस्योत्तरार्थत्वे नाप्युपपत्तेः प्रकरणाच्च वाक्यं बलीयः । ननु क्वचिदन्यवचनेऽपि प्रकृतां समुच्चीयते[80] न तु बाध्यते। सत्यम्। तत्रोभयो:राकाङ्येऽपि समुच्चयार्थे न चकारापत्ते राकाङ्क्षोत्थाप्य तेन चेह समुदयार्थश्च[81] कारः क्रियते। यद्येवं यथा गुणसंज्ञया प्रकृतापि वृद्धिसंज्ञा बाध्यते एवं कृत्संज्ञया प्रत्ययसंज्ञापि बाध्येत । सन्निहितकृदादिसंज्ञाभिस्तव्यादीनां निराकांक्षत्वादिति चेत्। सत्यम्।

नेह तव्यादिभिस्तदाकाङ्क्षया प्रत्ययसंज्ञापि बाध्येत। सम्बन्धो भवति किन्तु प्रत्ययसंज्ञास्ति तव्यास्त्वाकाङ्क्षया तैः संबध्यते।

न च प्रत्ययसंज्ञापि सन्निहितसनादिभिः निराकाङ्क्षा न तव्यादीनाकाङ्क्षा इति वाच्यम् । यतो बहुविषया स्यात् कतिपय विषयलाभे आत्मनो बहुविषयत्वलाभाद् पुनः पुनर्विधयन्त न आकाङ्क्षाण्वत्सम्बन्धयोः तव्यादी तथाकाङ्क्षति। बहुविषयत्व चास्या संज्ञिविशेषसम्बन्ध विनाधिकारेण विधानादवसीयत इत्याहुः । अथवा वक्ष्यत एतत् । अनुवर्तते च नाम विधयोरचानुवर्तनादेव सम्बंध्यतेऽपि तर्हि यत्नात् इति। तथाहि विभावतिलमाषेत्यत्रोमामंगधो स्वान्यत्वाद्यता श्रुते खञो प्राप्तौ नोदितायां खञ् ग्रहणस्यानुवृत्तिराश्रित अनुवर्तमानश्च[82] खञ् व्रीहिशाल्यादिभिर्न संबध्यते। यत्नाभावात्[83]।

इह तु विभाषा श्रुत्यायनेन तिलादिभिरेव सम्बध्यते तथेहापि वृद्धिग्रहणमदेङ्. गुण इत्यत्रानुवर्तमानमपि यत्नाभावाद दे ङाभिर्न सम्बध्यते। इह पुनर्गुणवृद्धिग्रहणाद्यत्नात्सम्बध्यते। यद्यप्ययं चकारकरणाच्चेति परिहारेण गतार्थस्तथापि तत्र विशेषरूपेणोक्तमत्र तु सामान्यरूपेणेति विशेषः। अथवा धिकारेणोपस्थिताया अपि वृद्धिसंज्ञाया अभपदसंज्ञात्समुच्चयो न भवति चकाराकरणादिति पूर्वमुक्तमिह तु यत्नाभावाद् वृद्धिसंज्ञाया उपस्थितिरेव नास्तीति विशेषः उच्यते।

न तु न विभाषाग्रहणं यत्नः यतो धामवाचिनस्तेषां यतामुक्ते खञपि यथा स्यादित्येवमर्थत्वात् । अन्यथा महाविभाषयापि पक्षे वाक्यमेव स्यान्न खञ् यत्रोत्सर्गापवादौ महाविभाषया विकल्पितौ तत्रापवादे ननूक्ते उत्सर्गो न प्रवर्तत इति ज्ञापितत्वात्। एवञ्च विभाषाग्रहणमन्यथा सिद्धत्वादनुमानमन्यो[84] खञ् सम्बन्धे यत्नत्वं न प्रतिपद्येतेति चेत्। अत्रोच्यते-व्यक्तिः पदार्थ इति पक्षे प्रत्येकं तिलादिभिः विभाषाग्रहणं सम्बध्यते। तत्र यदेतदुमाभंगयोरस्योपस्थानं तद्यतामुक्ते खञः सम्बंधे यत्नोभविष्यति पक्षे वाक्यस्य महाविभाषयैव सिद्धेरेतयोस्तत्सम्बंधस्य निःप्रयोजनत्वापत्तेः । न चानयो सम्बंधकल्पने प्रमाणाभावः । यदिहियतामुक्ते वाक्यान्यनुज्ञानार्थे चेयं स्यान्न खञ्सम्बंधार्था ततो यवपवरूषधिको या भंगाद्यदित्येकयोगमेव कुर्यात् । यतुपुनर्विभाषाग्रहणेन यत्नं विकल्पयति। ततो वसीयते तिलादित्य इवात्यामपियतामुक्ते पक्षे खञपीष्ट इति सामर्थ्या[85] व्यवहितोऽपि खञनुवर्तमानोऽत्र सम्बध्यत इति। कश्चिदाह । उमाभंगयो रधान्यत्वादिति अयुक्तम् । सप्तदशानि धान्यानीति स्मृतावुमाभंगयोरप्युक्तत्वात्।

न च व्रीहयश्चगोयवाश्रय इति च मकानुवाकेषां भावमात्रेण धान्यानामपि केषाञ्चित् कोऽवादीनां तत्राप्यागत।

अधान्यातामप्यन्मीदीनां तत्र पाठादुभयो व्यभिचारादिति। तदेतदयुक्तम् । स्मृतिपुराणादिषु तयोरदर्शनात् । तथा हि षट्त्रिंशन्मते तावत् ।

यवगोधूमधान्यानि तिलाः कंगुस्तथैव च
श्यामाकं वीनकं चैव सप्तधान्यामुदाहृतम् ॥

व्रीहयश्च यवाश्चैव गोधूमाः कंगुकास्तिलाः। प्रियङ्गवः कोविदाराः कोररूषाः सवारकः । माषामुद्गमसूराश्च निःपाचा स कुतत्यका। आटक्य अणकाश्चैत शणसप्तदशाः स्मृतः । इत्येता ओषधीनां तु ग्राम्याणां जातयः स्मृताः । औषध्यो यज्ञियाश्चैव ग्राम्याख्यश्चतुर्दशः । व्रीहयश्च यवाश्चैव गोधूमाः कंगुसर्षपाः । माषामुद्गः सप्तम्याश्च अष्टमाश्च । श्यामाकाश्चैवनीवाराजर्तिलाः स गवेधुकाः। कोविदार समायुक्तास्तथा वेणयवान्धये ग्रामाख्यास्मृता येता रूषध्यश्च चतुर्दशः स्कन्दपुराणे यवगो धूधान्यामितिलाः कंगुकुलस्यनम्:

माषामुद्गमसूराश्च निष्पावारयाय सर्षपाः । गवे धुकाश्चनीवारा स वीणकः । चणकाश्च चकाश्चैव धान्यान्यहार: शैव तु धान्यानि शालपः निष्पाषावद् । नीवारामुनिधान्यानि चक्षुकाराज माषाः सदीनकाः कलापाः। क्वचित्तुकौद्रवाः श्यामसर्षपा इति पाठः।

अथवा नात्र स्वरित लिङ्गसंज्ञेन वृद्धिग्रहणानुवृत्तिरूहयते किन्त्विक इति सूत्रे आकाङ्क्षावशाद् द्विग्रहणं गुणग्रहणं च सम्गच्छते। समुदायापेक्षायां चानन्त रस्येति न्यायो नास्ति समुदाये भेदाभावात्। यद्यपि समुदायः शब्दोपात्तो नास्ति तथापि तीक्ष्यात्बुद्धेर्बुद्धौ द्वयमपि योग्यत्वात् ।

सन्निधीयते न कर्मणेति समुदायवाचो[86] युक्तिः तदेवमर्थाधिकारेऽपि नादेडो वृद्धिसंगत इति सिद्धमिष्टम् ।

न च सति स्वसंज्ञयाविधाने को दोषः। उच्यते द्यौः पन्था: स इममित्यौत्वमात्वमत्व चेक एवं[87] स्यान्नान्त्यव्यञ्जनस्य अत्र स इत्येतदनुदाहरणं तच्छब्दे इको संभवादिक एवेति नियमः प्रसाड्त्। किन्तु स इयं हतं रूत वंश पृच्छ इति वैदिकवाक्यप्रतीकोपादानमेतदिति वदन्ति । अत्राहु:-असति स्वसंज्ञाविधाने नियमेत्यदादीनाम[88] इत्यत्रेक इत्युत्पत्तिष्ठते । भवत्यदादीनां विशेषणे द्विशब्दे एको गृह्येत। त्यदादीनामिक इति व्यधिकरणविशेषणेऽपि हीदमोरेव स्यात्। न चैव हीदमोम इत्येव वाच्यं किञ्च त्यदादीनामिति[89] गुरूकारणमिति शंक्यम्। संज्ञोपसर्जनव्यावृत्यर्थ गणेनैव निर्देष्टुमुचितत्वात् । तदोः स सावनन्त्ययोरि[90]त्युत्तरात्रानुवृत्यर्थञ्च । तस्यादसति स्वसंज्ञाविधौ नियमे त्यदाद्यत्वं हीदमोरेवस्यान्न तु स इत्येवमादाविति भवत्येवेदमुदहरणमिति । तन्न । एतत्तदोः सुलोपोऽकोरनञ्[91] समासे हलीति ज्ञापकादनिकोप्यत्वं भविष्यति। अन्यथा हल्ङयादिलोपेनैव सिद्धत्वात्किमनेनेति।

न चैतन्नसमासे निषेधार्थ स्यादिति वाच्यम् । असमर्थसमासाश्रयणापत्तेः । न चैतत्तदोः हल्यादिलोपश्च[92] स्यात् तहर्यनञ्समास एवैति नियमार्थे तदिति वाच्यम्। नियमात् विधिरेव ज्यायस्त्वात् ज्ञापकतापक्षे विधित्वस्य संभवात् । अकोरिति च निषेधोऽनर्थकः स्यात् । कृतेऽपि तस्मिन् हल्ड्.यादिलोप प्रसात सोऽपि नियमार्थ इतिचेत्। मैवम्। अनेकनियमकल्पने त्वसमर्थः समासो वाक्यभेदकल्पनाप्रसंगश्च अन्ये तु सोऽचि लोपेऽस्य छन्दसि बहुलमिति सुलोपारम्भो ज्ञापक इत्याहुः । स एषां ग्रामणीरित्यादि निर्देशोऽपि ज्ञापकंत्यदाद्यत्वमिकोऽपि भवतीति। किञ्च त्यादादीनामित्यु भूतावयवभेदसमुदाय निर्देश व्यक्तिपक्षोनाश्रीयते। तेनात्रेकपरिभाषा न प्रचक्षन्त इति युक्तं स[93] इत्येतदनुदाहरणमिति। अत्र प्राञ्चः- मा भूत् स्वसंज्ञया विधाने नियमः ।

न चैवं द्यौरित्यादावतिप्रसंगः सर्वत्रस्थानिनिर्देशात् । तथाहि दिव औदित्यत्र[94] दिवोवृद्धिभूतस्येति वकारो निर्दिश्यते तेन वकारस्यैव भविष्यति। किञ्च वकारो न श्रूयते वलिलोपादिति चेत् । न । दिव उदित्युत्वेन[95] परेण बाधनात् । धुव इति निर्देशापत्तेः। अन्यथा धुभ्यामित्यत्रापि वलिलोपप्रसंगात्। यत्तु विधेयस्य प्रानिर्देशेन लोपो वलीयानिति वदन्ति तदष्टकविलोपापेक्षयैवेति चेत् ।

एवं तर्हि विवकारे वलि चेति वक्ष्यामि। तत्र वलीत्येव सिद्ध वकार प्रश्लेषसामर्थ्यात्परमप्युत्वं बाधित्वा लोपो भविष्यति। यद्येवं धुवाक्षक इत्यत्रापि प्राप्नोति एव तर्हि द्वितीयोऽपि वकारः प्रश्लेष्यते । व् च असौ व् च केवलो यो वकारः स पुनः स्वरूपार्थकः तस्मिन्वलि

चेत्यर्थान्नाति प्रसङः तत्र द्वयोः हलो यमा यमिलोपादश्रवणम्[96] । अथवा वलीत्येव लोपोऽस्तु मा प्रश्लेषे वद्वयी। उत्वं तु न भविष्यत्यर्थवद्ग्रहणपरिभाषया ।

ननु स्वरूपमप्यर्थ[97] इत्यर्थ वाने वायमिति चेन्न सर्वत्रापि तादृगर्थवन्नासंभवतीत्युद्भावितपरिभाषाया निर्विषयत्वादिति । अत्राह-प्रज्ञाचक्षुः अयुक्तमेतत् । व प्रश्लेषे प्रमाणाभावात्।। दिव इति निर्देशानुपपत्तिरेव मानमिति चेत् । न वकारप्रश्लेषेणापि तदुपपत्तेः दिव उदिति विधिविरोधे।

न च प्रश्लेषस्य बाधितत्वाच्च । सति वद्वयप्रश्लेषे द्विवकारनिर्देशः । तस्मिंश्च सति वद्वयप्र इतीतरेतराश्रयाच्चेति। तदसत्। क्ङिति चेति[98] कितीत्यादौ गकारप्रश्लेषे बोध्यः तस्येत्यत्र वप्रश्लेषे इलोव्युपधादित्यत्र वप्रश्लेष इवात्रापि व्याख्यानस्यैव प्रमाणत्वात्।

प्रयोगानुरोधित्वाद् व्याकरणस्मृतेद्यौरिति प्रयोगस्य लोकवेदसिद्धत्वेन वकारस्यैवौत्वमित्यवधारणे न च प्रश्लेषस्य स्पष्टमवधारणात् । न हि प्रागुक्तगकारादिप्रश्लेषेष्वप्यतोऽतिरिक्त[99] प्रमाणमस्ति।

यत्तु सिद्धं धर्मिणमिति न्यायेन व्योर्लोपो वलीति निर्देष्टव्येऽन्यथा निर्देशो हलोप नास्त्येतत्प्रवृत्यर्थो ज्ञापको वकारप्रश्लेष इति वदन्ति । तदसत् विधेयस्य प्राक् निर्देशो वेरपृक्तलोपाद् वलिलोपो वलीयानिति[100] ज्ञापनार्थ इति। स्थितत्वात् । न आदेशस्य हि स्थान्याकाङ्क्षाप्रथमं चरमं निमित्ताकाङ्क्षाघोर्लोपोव्योर्वलि[101]' वा शास इदङ्हलो[102] रित्यादावुत्सर्गतो दृष्टः। अथ शीङ:[103] सार्वधातुके गुण: ककुदस्यावस्थायां लोप इति वदति यमोऽपि दृश्यत इतिचेत् । तर्हि लोपो वलि व्योरित्यनिर्देशोऽनैकान्ततो व प्रश्लेषे प्रमाणं विचित्रा सूत्रस्य कृतिरिति । यदप्युक्तं लोपस्य प्रानिर्देशो वेरपृक्त[104]स्येत्यस्मात्पूर्वप्रवृत्तिमेव ज्ञापयेदिति न वाच्यम् । प्रमाणाभावेनोभयस्य विज्ञापनादिति । तदप्यसत् ।

लोपो वलिव्योरितिनिर्देशे लोपस्त्ववद्वप्रश्लेषस्य ज्ञापयितुमशक्यत्वात् । वलि व्योर्लोप इति वलोपवलीयस्त्वस्य व प्रश्लेषस्य च लोपो व्योर्वलि इति पाठ एवोभयं ज्ञापयतीति चेत। पा० एवामय ज्ञापयताति चेत्।

न तत्र हि लोपस्य प्रानिर्देशस्तावद् वप्रश्लेषे न समर्थः वलीत्यतः पूर्व व्योरिति निर्देशोऽपि न समर्थः। कार्यनिमित्तयो निर्देशे पौर्वापर्या नियमस्यैच्छिकत्वादन्यथानुपपत्तिवृरिक्षयात् । किञ्चान्यतरपरतयावधारिते सामोपक्षयादर्थोत्तरज्ञापकतापि नोदेति। एतेनैतदव्यपास्तम् । यदि वकार प्रश्लेषार्थो निर्देशो नाभिमतः स्यात्तदा वेरपृक्तस्ये[105]त्यत्रैव लोपो व्योर्वलीत्यनुवर्तते न त्विमं निर्देशमिति। एतावतापि हिलोपवलीयस्त्वं ज्ञापकत्वमस्य निरस्तं व प्रश्लेषार्थतानुकथं समर्थ्यतां प्रागुक्तदूषणग्रासात् वेरपृक्तस्येत्यत्र चानुवृत्तौ न । किञ्चित्प्रमाणमुपन्यस्तम् । तदास्तां तावद् वप्रश्लेषछदिनस्तेप्रकरे परं विपर्ययः वस्तुतस्तु व्योर्वलीत्य[106] त्राचो रहाभ्यामिति[107] द्वित्वे पुनर्द्वित्वे च हलो यमामिति व द्वयी प्रत्यक्षैव सानुलक्षणलोपः परेणाप्यवश्यं स्वीकार्य एव । तत्रैतावत्येव विवादः तवद्वित्वकृता व द्वयी प्रश्लिष्टा। लोपाभावपक्षे तु वद्वयीप्रत्यक्षैव सानुलक्षणवशसंपन्ना।

यदि व पूर्वैव तात्पर्यागत उभयथाप्युच्चारणेन कोऽपि विशेषः किन्तु कुत्रार्थे सूत्रकृतस्तात्पर्यमिति संशये मत्पक्ष इव त्वत्पक्षेऽपि नियामका भावात्प्रयोजनानुरोधात्प्रश्लेष एव व्याख्यायतामेवं व कृत्वा स्वसंज्ञाविज्ञाने नियमार्थो यत्र न कर्तव्यो भवतीति लाघवं[108] संपत्स्यते इति व्याख्यातार: पर्यनुयुज्यन्ते तत्र प्रमाणाभावादनारम्भनियम इति। तदप्यसमीक्षिताभिधानात् । जाति पक्षेऽनर्थकीकृतस्यैकशास्त्रस्य संज्ञापरिभाषादिवत् द्विवचनेऽचीत्यादिसौत्र मात्रप्रयोगनिर्वाहार्थत्वस्य कैयटेनोपवर्णितत्वात् । यत्तु धुवः स्थाने जातत्वात् धुभ्यामित्यादावुकार: सम्प्रसारणसंज्ञ इति वैयाकरणप्रयोगेव द्वयनिर्देशाद् वलोपः स्यात् । तच्चानिष्टं वृद्धेस्तथाऽव्याख्यानात् । न चेतादृशः प्रयोगो नास्तीति वाच्यम् । अर्वाग्दृशां तदभावस्य दुरवधारत्वात्। ईश्वरप्रसादासादितसार्वज्ञसूत्रभाष्यवार्तिकारवचनात्तु वरीर्वति परो नास्तीति प्रकारात्प्रयोगाभावावधारणप्रयोगस्वीकारे तद्वचनविरोधाद् वादिप्रभृतीनां चान्तानां यङ्. लुको वा न च प्रकृते तद् वचनविरोध इति। तदसत् । प्रयोगाभावस्येव प्रयोगसत्वस्यापि दुरवधारत्वेनाति प्रसस्याप्यापादयितुमशक्यत्वात् । अथ यथा लक्षणमप्रयुक्त इति न्याये वृद्धव्याख्यानविरोधादीदृशः प्रयोगोत्प्रेक्ष्यत इति चेत् । न हि प्रतिसिद्धमनुमतं भवतीति न्याये न च द्वयनिर्देशस्य वृद्धैरनिराकृतत्वेन तत्प्रयोगाभावस्यापि सूत्प्रेक्षत्वात् । साध्याभाववक्षया चानिश्चिते धर्मिणि पक्षतुल्ये लक्षणव्यभिचारस्य दूषणत्वाच्च।

अथाप्यस्य कथञ्चिदस्ति त्वमप्युपेयेत । तत्रैव समर्थनीयं द्युभ्यामित्यादौ[109] दृष्टस्य धुशब्दस्य रूपानुकरणं धुशब्दस्तस्य वः धुवर्श इति विग्रहो न दिवशब्दे ना दिव शब्दे न तर्हि विग्रहे कथ भवितव्यम् । यदि व द्वयनिर्देशः प्रमाणं दिव इति भवितव्यम् । तदभावश्चात् । धुव इति किं पुनरत्रार्थतत्वं देवा एतत् ज्ञातुमर्हति। यतो नादिप्रयुक्तेषु लक्षेणातिपरिक्षितुं क्षमन्ते व्यभिचाराधानात्।

तदुक्तम्। लौकिकव्यवहारेषु यथेष्टं चेष्टतो जनः। वैदिकेषु तु मार्गेषु विशेषोक्तिः प्रवर्तते इति।

न च धुशब्दे वकार इति बाधः । साम्प्रतिकाभावे भूतपूर्वगत्या तत्संभवात् । अन्ये त्वाहुः। न ङिसम्बुद्ध[110]योरिति लिाद्यत्र सुपो लुग्भावी[53] तत्र भसंज्ञाविषये पूर्व पदसंज्ञा प्रयुक्तमेव कार्य[111] कर्तव्यं पश्चात्सुपो लुगिति ज्ञाप्यते । अन्यथाद्रेवर्मन्नित्यादावलुप्ते डौ भत्वेन न लोपाप्रसक्तेलृप्ते तु न लुमतेति निषेधाय नाङिपरत्वासंभवेन निषेधाप्रसङ्गत्।

ततश्च धुवः स्थान इत्यत्रापि षष्ठी समासे आदावुत्वे कृते पश्चात्यण भविष्यति न चेदानी वलोप प्रसङः । अन्तरडेणे त्वे नै व वस्यापहानात् । अविधित्वाच्च स्थानिवद्भावोऽपि नास्ति । यत्र चोत्ववलोपयोरेककालाप्राप्तिस्तत्रैव व प्रश्लेषेणोत्वं बाध्यते। न चेह तथेति न चैवं सूत्रेप्युत्वापत्तिः। द्यौश्चासौ वृचेति विग्रहो न तु दिवोऽपि । तत्र ज्ञापकस्य भविषयत्वेन लुकि कृते पश्चात्प्राप्त्युत्वं तुल्यकालेन वलोपे न बाधिष्यते। विशेषणेन तदन्तविधेः समानाधिकरण्यं स्वीकारान्तस्य दिव इति। विशेषणस्यापि सौत्रपरनिपात इति । तदयुक्तं दिवो वान्तत्वाव्यभिचारेण विशेषण समासानुपपत्तेः ।

सन्दर्भ ग्रन्थाः -


1. मूलपाठे प्रज्ञावक्षुनाह असाधुः प्रज्ञाचक्षुराह साधुः ।
2. ऋतश्च संयोगादेर्गुणः' (अष्टा – 7.4.10)
3. गुणोऽति संयोगाद्यो' (अष्टा - 7.4.29)
4. 'ऋच्छत्युताम्' (अष्टा – 7.4.11) '
5. ऋदृशोऽङ्गुणः' (अष्टा – 7.4.16)
6. शीङः सार्वधातुके गुणः (अष्टा – 7.4.21)
7. ओर्गुणः (अष्टा – 6.4.146)
8. सार्वधातुकार्धधातुकयोः (अष्टा - 7.3.84)
9. गुणो यङ् लुको (अष्टा – 7.4.82)
10. मूलपाठे संनुद्धि असाधु, सम्बुद्धिः साधुः ।
11. जसि च (अष्टा - 7.3.109)
12. उतो वृद्धि कि हलि (अष्टा - 7.3.89)
13. मूलपाठे नुर्णोतेर्विभाषा असाधुः, ऊर्णोतेर्विभाषा साधुः ।
14. 'श्रयुकः किति' (अष्टा - 7.4.11)
15. मूलपाठे तत्पुनुष इति असाधुः, तत्पुरूष इति साधुः।
16. मूलपाठे वक्ष्यमाणनीत्या इति असाधुः, वक्ष्ययाणरीत्या साधुः ।
17. मूलपाठे सिदेर्गुणः इति असाधुः मिदेर्गुणः इति साधुः ।
18. मूलपाठे बाधापन्ने असाधुः, बाधापत्ते साधुः ।
19. मूलपाठे पनसप्तमी इति असाधुः, परसप्तमी इति साधुः ।
20. मूलपाठे ननत्प्रसंगः असाधुः, न तत्प्रसंग:साधुः ।
21. मूलपाठे मृद्दिदृशिमुचिगुणेऽपि असाधुः, मृजिदृशिमुचिगुणेऽपि साधुः।
22. ‘हलादिः शेषः (अष्टा – 7.4.60)
23. मूलपाठे जाग्र असाधुः, जागृ साधुः।

24. मूलपाठे विधिनत्र असाधुः, विधिरत्र साधुः ।
25. मूलपाठे व वेषां असाधुः, न चैषां साधुः ।
26. 'ईदूदेदद्विवचनं प्रगृह्यम्' (अष्टा – 1.1.11)
27. मूलपाठे उज इति असाधुः, उञ इति साधुः ।
28. 'उञ' (अष्टा – 1.1.17)
29. मूलपाठे भानुदंधसौ असाधुः, आनुबंध सौ साधुः ।
30. 'प्रथमयोः पूर्वसवर्णः (अष्टा - 6.1.102)
31. मूलपाठे मोनाजीतिवत् असाधुः, मोराजीतिवत् साधुः ।
32. 'घेर्डिति' (अष्टा - 7.3.111)
33. 'ङिति च' (अष्टा – 1.1.5)
34. मिगुणः (अष्टा - 7.3.82)
35. मूलपाठे नान्तनयकत्वादनुवर्तत असाधुः, नान्तरीयकत्वादनुवर्तत इति साधुः ।
36. मूलपाठे श्यनूपमेव साधुः, स्वरूपमेव साधुः।
37. 'अदेगुणः' (अष्टा – 1.1.2)
38. मूलपाठे स्वनूपपनत्व साधुः, स्वरूपपरत्व साधुः ।
39. 'पुगन्तलघूपधस्य च. (अष्टा - 7.3.86)
40. 'गुणो यङ्लुकोः' (अष्टा – 7.4.82)
41. मूलपाठे यङ्लुकोनिति असाधुः, यङ्लुकोरिति इति साधुः ।
42. मूलपाठे शास्त्ररम्भाक्षेपोऽति असाधुः, शास्त्रारम्भाक्षेपोऽपि साधुः ।
43. मूलपाठे वृद्ध्यविकाने असाधुः, वृद्ध्यधिकारे साधुः ।
44. 'दिव औत्' (अष्टा - 7.1.84)
45. मूलपाठे वृद्धिनित्येवं असाधुः, वृद्धिरित्येवं साधुः।
46. मूलपाठे स्मात् असाधुः, स्यात् इति साधुः।
47. मूलपाठे एत्राश्रित इति असाधुः, एवाश्रित इति साधुः ।
48. मूलपाठे अंतनंग इति असाधुः, अन्तरड़ इति साधुः ।

49. मूलपाठे पनिहानाय इति असाधुः, परिहाराय इति साधुः ।

50. मूलपाठे कामवार इति आसाधुः कामचार इति साधुः ।

51. 'आदेच उपदेशेऽशिति' (अष्टा - 6.1.45)

52. मूलपाठे उपनंजक इति असाधुः उपरजक साधु।

53. मूलपाठे पुनुषस्य इति असाधुः ।

54. पुरूषस्य इति साधु । 'मनोरौ वा' (अष्टा - 4.1.38)

55. मूलपाठे पूजक्रतौरैवेत्यत्र असाधुः, पूतक्रतौरैवेत्यत्र साधुः ।

56. मूलपाठे पानार्थ्यात् इति असाधुः सामर्थ्यात् इति साधुः ।

57. मूलपाठे वक्षते इति असाधुः चक्षते इति साधु ।

58. 'निपात् एकाजना ङ् (अष्टा – 1.1.14)

59. मूलपाठे ङ्यायू इति आसाधुः ङ्याप् इति साधुः ।

60. 'याप प्रातिपदिकात्' (अष्टा – 4.1.1)

61. 'धातोः' (अष्टा - 3.1.91)

62. मूलपाठे पिवक्ष्यते इति असाधुः, विवक्ष्यते इति साधुः।

63. 'षष्ठीस्थानेयोगा' (अष्टा – 1.1.49)

64. वृद्धिर्यस्याचामादि तवृद्धम्' (अष्टा – 1.1.73)

65. मूलपाठे वृद्धिर्यस्यावासादिरित्यादविव असाधुः, वृद्धिर्यस्याचामादिरित्यादाविव साधुः।

66. अलोऽन्त्यस्य' (अष्टा – 1.1.52)

67. मूलपाठे प्रधातमिति असाधुः प्रधानमिति साधुः।

68. मूलपाठे प्रयंवितं इति असाधुः, प्रपञ्चितं साधुः ।

69. मूलपाठे नोअपयन्ति इति असाधुः, नोत्थापयन्ति साधुः।

70. 'वृद्धिरादैच' (अष्टा – 1.1.1)

71. मूलपाठे नियामकानावात् इति असाधुः, नियामकाभावात् इति साधुः।

72. वृद्धिरादैच्" (अष्टा – 1.1.1)

73. मूलपाठे पृहपतये असाधुः, गृहपतये साधुः ।

74. 'इग्यमः सम्प्रसारणं' (अष्टा – 1.1.1)
75. मूलपाठे वावो इति असाधुः, वाचो साधुः ।
76. मूलपाठे उषतेन इति असाधुः, उषतेर साधुः ।
77. मूलपाठे मउपतिष्ठत असाधुः, मदुपतिष्ठत साधुः।
78. 'अदेगुणः (अष्टा – 1.1.2)
79. मूलपाठे समुघयार्थे असाधुः, समुच्ययार्थे साधुः ।
80. मूलपाठे समुद्द्यार्थश्चकारः असाधुः, समुदयार्थश्चकारः साधुः ।
81. मूलपाठे अनुवतसानश्च असाधुः, अनुवर्तमानश्च साधुः ।
82. मूलपाठे यत्ताभावात् असाधुः, यत्नाभावात् साधुः ।
83. मूलपाठे सिद्धात्वादुमानगयो असाधुः सिद्धत्वादनुमानमन्यो साधुः।
84. मूलपाठे सान• इति असाधुः, सामर्थ्या इति साधुः ।
85. मूलपाठे समुदायवाबो असाधुः, समुदायवाचो साधुः ।
86. मूलपाठे एघ इति असाधुः, एव इति साधुः ।
87. मूलपाठे त्वदादीनाम् इति असाधुः, त्यदादीनाम् इति साधुः ।
88. 'त्यादीनामः' (अष्टा - 7.2.02)
89. 'तो सः सावनन्त्ययोः' (अष्टा – 7.2.06)
90. ‘एततत्तदोः सुलोपोऽकोरनसमासे हलि' (अष्टा - 6.1.132)
91. हल्याब्योदीर्घात्सुतिस्यपृक्तहल् (अष्टा - 6.1.68)
92. मूलपाठे म इति असाधुः, स इति साधुः ।
93. 'दिव औत्' (अष्टा - 7.1.84)
94. 'दिव उत्' (अष्टा – 6.1.131)
95. 'हलोयमा यमिलोपः (अष्टा – 8.4.64)
96. मूलपाठे स्वनुपमप्यर्थं असाधुः, स्वरूपमप्यर्थं साधुः ।
97. 'क्ङिति च' (अष्टा – 1.1.5)
98. मूलपाठे अतिनिक्तं असाधुः, अतिरिक्तं साधुः ।

99. मूलपाठे वलीयातिति असाधुः बलीयानिति साधुः ।

100. व्योर्लोपो वली इति असाधुः लोपो व्योर्वलि इति साधुः ।

101. 'शास इदहलोः (अष्टा – 1.1.5)

102. मूलपाठे शीरः असाधुः, शीङः साधुः ।

103. वेरपृक्तस्य' (अष्टा – 1,1.5)

104. वेरपृक्तस्य' (अष्टा – 1.1.67)

105. 'लोपोव्योवलि (अष्टा – 6.1.66)

106. 'अचो रहाभ्यां द्वे (अष्टा - 8.4.46)

107. मूलपाठे त्वाघवं असाधुः, लाघवं साधुः। ।

108. मूलपाठे घुत्भ्यामित्यादौ असाधुः, द्युभ्यामित्यादौ साधुः ।

109. 'न ङि सम्बुद्धयोः (अष्टा – 8.2.8)

110. मूलपाठे लुगमावी असाधुः, लुग्भावी साधुः ।

111. मूलपाठे कार्यां असाधुः, कार्य साधुः ।